I2OR Impact Factor : 3.250 ISSN 2349-364X

# वेदाञ्जली Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-८ अंक-१६, भाग-४ जुलाई-दिसम्बर, २०२१

प्रधान सम्पादक

डॉ० रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

वेदाञ्जली, An International Peer Reviewed Refereed Research Journal
वर्ष-८, अंक-१६, भाग-४, जुलाई-दिसम्बर, २०२१ | ISSN : 2349-364X | I2OR Impact Factor : 3.250

# न्याय-वैशेषिकदर्शनयोः वैदिकत्वम्

डा. भास्करभट्टः जोशि*

अस्य प्रबन्धस्य अवश्यकता अस्ति वा ? इति चेत् अस्त्येव। (Thomson Gale) पाश्चात्याः स्वस्वप्रबन्धेषु न्यायदर्शनं वैदिकं अहोस्वित् अवैदिकम् इत्यत्र महताप्रयासेन अवैदिकत्वं प्रतिपादयति इति ज्ञायते। अतः अस्य दर्शनस्य वैदिकत्वप्रतिपादने कश्चन प्रयासः मदीयः।

न्यायदर्शनस्य वैदिकत्वम् इत्यत्र चिह्नानि यथा,

1. **चतुर्दशविद्यास्थानेषु पठितत्वात्।**
2. **वेदप्रामण्यस्य स्वीकृतत्वात्।**
3. **सकलग्रन्थेषु वैदिकपरम्परायाः आश्रितत्वात्(मङ्गलाचरणादि)**
4. **शब्दप्रामाण्यस्य अङ्गीकृतत्वात्।**
5. **ईश्वरस्य अङ्गीकृतत्वात्।**
6. **अनुमानस्य प्रत्यक्षागमानुसारेण प्रामाण्याङ्गीकृतत्वात्**

दर्शनम्

प्रपञ्चेऽस्मिन् स्वीयपरम्परावैशिष्ट्येन भासते भारतं नाम कर्मधर्मभूमिः। इदम् भारतं दर्शनानाम् आकरः। किमिदं दर्शनम् ? दृश्यते अनेन इति दर्शनम्। भरतीयदर्शनानां किं वा लक्ष्यम् इति चेत् इत्थमामनन्ति दार्शनिकाः, येन साधनेन इदं विश्वम् इदं वस्तुजातम्, जीवात्मा प्रकृतिश्च यथागथ्येन दृश्यते, समीक्षते तद्दर्शनम्। अतः समग्रमपि आध्यात्मिकम्, आधिभौतिकं च विवेचनं दर्शनशब्दान्तरगतम्। तेन च परमपुरुषार्थस्य परमसुखरूपस्य प्राप्तिः तदुपायज्ञानद्वारा भावति, तदर्थं च बहवः विचाराः कर्तव्याः भवन्ति।

भारतीयदर्शनानि स्थूलरूपेण द्वेधा विभज्यन्ते। आस्तिकदर्शनानि नास्तिकदर्शनानि च इति। यानि दर्शनानि वेदानां प्रामाण्यमङ्गीकृत्य पूर्वोक्तविचारं कुर्वन्ति तानि आस्तिकदर्शनानि। यानि च वेदानं प्रामाण्यं नाङ्गीकुर्वन्ति अपि तु केवलेन प्रत्यक्षिकज्ञानेन अनुमानेन वा जगतत्वम् आत्मतत्त्वं विचार्य निर्णयन्ति तानि नास्तिकदर्शनानि तत्र न्यायवैशेषिकसाङ्ख्य-योगमीमांसावेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि। चार्वाक जैनबौद्धादिदर्शनानि च नास्तिकदर्शनानीति प्रथितानि। तेषु आस्तिकदर्शनेषु अन्यतमं दर्शनं न्यायदर्शनम्।

न्यायदर्शनशब्दास्य अर्थविवरणप्रसङ्गे भगवान् वात्सायनः आह - प्रमाणैरर्थपरीक्षणं न्यायः[1] प्रत्यक्षः आगमाश्रितमनुमानं प्रत्यक्षागमाभ्याम् ईक्षितस्य अन्वीक्षणम् आन्वीक्षा[2]। अस्य ईदृशार्थप्रतिपादकत्वं तत्वचिन्तामणिकरेणापि अभ्यनुज्ञातम् - उक्तं च प्रत्यक्षतत्वचिन्तामणौ" अथ जगदेव दुःखपङ्कनिमग्नम् उद्दिधीर्षुः अष्टादशविद्यास्थानेषु अभ्यरहिततमाम् आन्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय[3]।

अनेन न केवलं न्यायदर्शनप्रतिपाद्यः गुणः अभिहितः अपि तु अस्य सर्वोत्कर्षः अपि प्रतिपादितः। सर्वोत्कर्षः च परमपुरुषार्थः साधनत्वात्। गौतमोक्तन्यायसूत्रमेव प्रमाणमत्र, "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभास च्छलजातिनिग्रहस्थानानां तत्वज्ञानत् निश्रेयसाधिगमः इति"[4]।

---

*सहायकप्राध्यापकः, क.सं.वि, बेङ्गलूरू

1. **चतुर्दशविद्यास्थानेषु पठितत्वात्।**
2. "आन्वीक्षिकी दण्डनीतिः तर्क विद्यार्थशास्त्रयोः"[5] इति च अमरकोषकारः। छान्दोग्योपनिषदि सप्तमाध्याये प्रथमखण्डे भूमविद्याप्रकरणे नारदसनत्कुमार-आख्यायिका श्रूयते। तत्र 'इदमहं जाने' इति, वद इति, सनत्कुमारेण अनुयुक्तः नारदः तर्कशास्त्रमपि स्वाधीतमाह-
3. 'स होवा च ऋग्वेदं भगवः अध्येमि यजुर्वेदं सामवेदाथर्वणं चतुर्थम् इतिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यम् एकायिनं देवविद्यां, ब्रह्मविद्यां, भूतविद्यां, क्षात्रविद्यां, नक्षत्रविद्यां, सर्पदेवजन्विद्याम् एतत् भगवोऽध्येमि इति' इत्यादिना। अत्र वाक्योवाक्यं तर्कशास्त्रम् इति शङ्करभगवत्पादाः रङ्गरामानुजमुनयश्च तद्व्याख्यानावसरे वाकोवाक्यशब्दस्य तर्कशास्त्रम् इति अर्थमवदन् वाकोवाक्यम् इत्यस्य-
4. वाक्योवाक्यमिति उक्तिप्रत्युक्तिरूपं वाक्यम्। पूर्वपक्षसिद्धान्तप्रश्न-समाधानादिरूपम् उच्यते। तर्कश्च अविज्ञाततत्त्वे अर्थे कारणोपपत्तितः तत्त्वज्ञानार्थम् ऊहस्तर्कः[6]
5. इति लक्षितः तादृशः इति" रङ्गरामानुजभाष्यव्याख्यानावसरे उत्तमूरुवीरराघवाचार्यस्वामिनः अवदन्। तथा च इयं विद्या श्रुतिप्रसिद्धा इति सिद्ध्यति।
6. अपि च -
7. पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
8. वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥[7]
9. इति याज्ञवल्क्यादिस्मृतिषु अपि चतुर्दश विद्यास्थानमध्ये तर्कविद्या इयं गणिता।
10. इमां विद्यां ये अधीयते ते नैय्यायिकाः तेषां यौगाः इति व्यपदेशोपि दृश्यते। स्याद्वादमञ्जर्यां वैशेषिकनैय्यायिकायोः प्रायः समानतन्त्रत्वात् औलूक्यमते क्षिप्ते यौगमतमपि क्षिप्तमवसेयमिति। प्रतितन्त्रसिद्धान्तलक्षणसूत्रे न्यायभाष्ये "पुरुषकर्मादिनिमित्तो भूतसर्गः कर्महेतवो दोषाः प्रवृत्तिश्च स्वगुणविशिष्टाः चेतनाः असदुत्पद्यते उत्पन्नं निरुध्यते इति योगानाम्"[8] इति ग्रन्थः दृश्यते। न हि इदं मतं प्रसिद्धयोगिनां मतम् इति वक्तुं शक्यते। तैः पुरुषस्य निर्गुणत्वाभ्युपगमात् असत्कार्यवादानभ्युपगमाच्च। अतः इदं नैय्यायिकमतमेव। अतश्च ग्रन्थान्तरसंवादेन भाष्ये योगशब्देन नैय्यायिकाः विवक्षिताः इति प्रतीमः। परन्तु मुद्रितन्यायदर्शनपुस्तके योगानामित्यस्य वैशेषिकाणाम् इति टिप्पणं समुपलभ्यते। असत्कार्यवादादिकञ्च वैशेषिकसाधारणमेव। अथापि ग्रन्थान्तरेषु कण्ठतः योगशब्देन नैय्यायिकानामभिधानात् तेऽत्र विवक्षिताः इति युक्तमिति भाति। युक्त्यपरपर्याययोगप्रधानविद्यापरिशीलिनां योग इति नाम अपि श्लिष्टमेव। तस्मात् लोकमात्रनिर्वाहकतया सरोपजीव्यस्य अनुमानस्य विप्रतिपन्नपुरुषप्रतिपादकतया, श्रेष्ठस्य सपरिकरस्य न्यायस्य, सर्वविद्यापेक्षिता प्रमाणादेव व्युत्पादनेन, प्रवर्तनारूपकार्ये स्वप्रतिपाद्यनिर्णये च सर्वासां विद्यानां बहूपकारकरणेन वेदप्रामाण्यव्यवस्थापनेन अपवर्गसाधनोपदेशपरत्वेन, श्रुतिस्मृतिसम्मतत्वेन अपवर्गसधनोपदेशपरत्वेन, श्रुतिस्मृतिसम्मतत्वेन च वाङ्मये उन्नतं पदम् अधिरूढविलसति न्यायदर्शनम् इति सिद्धम्।

अपि च प्रमाणम् ईश्वरं व्युत्पादयति इति न्यायविद्या अतोऽपि प्रमाणविद्याभिधानं भजते। साधन-आश्रययोः अन्यतरत्वे सति प्रमाव्याप्तं प्रमाणम्। प्रमाश्रयस्यापि जीवनस्य प्रमासम्बधिनियमाभावात् न प्रमाणता। इन्द्रियस्य तु साधनतया प्रमाणता। ईश्वरश्च प्रत्यक्षप्रमाणे

अन्तर्भवति। अतः 'मन्त्रायुर्वेदप्रमाण्यवच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्'[9] इति न्यायसूत्रं 'तन्मे प्रमाणं शिवः'[10] इति न्यायाचार्याणामुदयनाचार्याणाम् उक्तिश्च सङ्गच्छते। सर्वज्ञस्य ईश्वरस्य प्रमाणत्वं प्रतितन्त्रसिद्धान्तः।

यदाहुः तार्किकरक्षां वरदराजाचार्यः 'प्रतितन्त्रौ यथा न्याये सर्वज्ञस्य प्रमाणता' इति वेदकर्तृत्वेन ईश्वरं साधयितुमेव महता प्रबन्धेन शब्दानित्यत्वं न्यायसूत्रैः प्रतिष्ठापितम्।

आदित्यो यूपः इति श्रुतिः यूपस्य आदित्यतां न बोधयति। अपि तु आन्वीक्षिकीपरिशोधितप्रमाणादितया अपि स्वप्रतिपाद्यविषये आन्वीक्षिक्यपराभिधां तर्कविद्याम् अपेक्षन्ते।

किञ्च विद्यास्सर्वा अपि अभिमतसाधनतायाः अनभिमतोपायतायाश्च ज्ञापनेन तत्र तत्र प्रेक्षावतः प्रवर्तयन्ति निवर्तयन्ति च। तत्र किम् अविशेषेण साध्यसाधनेति कर्तव्यतासु प्रवर्तयन्ति आहोस्विदितिकर्तव्यतामात्रे। तत्र यदि साध्यांशोऽपि प्रवर्तनागोचरः तदा श्येनादिसाध्याः वैरिवधरुपाभिचारात्मकहिंसायाः विहितत्त्वेन च अनर्थत्वम्। अथ साध्यांशं रागतः प्राप्तम् अनूद्य साधनेतिकर्तव्यते एव विधीयते, ततः श्येनसाध्यायाः हिंसायाः श्येनेन अभिचरन् यजेत इति श्रुत्वा विहितत्वाभावेन 'न हिंस्यात् सर्वा भूतानि' इति निषेधविषयत्वात् अनर्थत्वं सिद्धम्। ततश्च साध्यांशे अप्रवर्तनम् आन्वीक्षिकीगम्यम्।

**आर्षं धर्मोपदेशश्च वेदशास्त्रविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥**[11] **इति।**

वदन् मनुरपिधर्मबोधकवेदादीनां धर्मबोधे जननीये आन्वीक्षिक्यपेक्षां ब्रूते। प्रवर्तकत्वरूपधर्मद्वारेण सर्वविद्यानाम् उपकारकत्वात् आश्रयेन न्यायविद्या। तथा च उक्तं वार्तिककारैः न्यायवार्तिके - 'सर्वासां विद्यानाम् इयम् उपकरोति। अकारित्वात् आश्रयः राजभृत्यवत्[12]। इति। अनेन न्यायविद्या, राजविद्या इत्युक्तं भवति। तदुक्तम्-

**प्रदीपः सर्वविद्यानाम् उपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥**[13] **इति।**

अपि च सर्वेषामपि विद्यास्थानानां मूलस्तम्भभूता आन्वीक्षिकी वेदप्रामाण्यहेतुत्वात्। वेदप्रमाणतया व्यवस्थापिते किल वेदवाक्यानाम् अर्थविचाररूपमीमांसादिविध्यास्थानस्य कृत्यम् अस्ति। कुतार्किकविरचितदुष्पूर्वपक्षकबलीकृते प्रामाण्ये, न मीमांसादिविद्यास्थानानम् अवसरः अस्ति। मीमांसोक्तस्तु अपौरुषेयतया वेदप्रामाण्यसाधनप्रकारः न समीचीनः तदुक्तीनां कुतार्किकयुक्तिभिः कबलीकृतत्वात्। तदुक्तं जरन्नैय्यायिकैः जयन्तभट्टपादैः न्यायमञ्जर्यां[14] न्यायविस्तरस्तु मूलस्तम्भभूतसर्वविद्यानां वेदप्रामाण्यहेतुत्वात्। वेदेषु हि कुतार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवितव्यायाससाध्यं वेदार्थानुष्ठानाम् आद्रियेरन् साधवः ? किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना, मीमांसादिविद्यास्थानपरिजनेन कृत्यम् इति। तस्मात् अशेषदुष्टतार्किकोपमर्ददद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षममिदमक्षपादोपदिष्टं न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनं परं विद्यास्थानम्" इति।

[15]"ननु वेदप्रामाण्यनिर्णयप्रयोजनञ्चेत् न्यायविस्तरः कृतमनेन, मीमांसातः एव तत्सिद्धेः। तत्र हि अर्थविचारवत् प्रामाण्यविचारोऽपि कृत एव। सत्यं सतु आनुषङ्गिकः। तत्र मुख्यस्तु अर्थविचारः एव। पृथक् प्रस्थाना ह्येमा विद्याः। सा च वाक्यार्थविद्या, न प्रमाणविद्या इति। न च

मीमांसकाः सम्यक् वेदप्रामाण्यरक्षणक्षमां सरणिमवलोकयितुं कुशलाः। कुतर्ककण्टकनिकर निरुद्धसञ्चरमार्गभासपरिभ्रान्ताः खलु त इति वक्ष्यामः इति च।

**5. ईश्वरस्य अङ्गीकृतत्वात्।**

**•ईश्वरसाधनाय कुसुमाञ्जलेः प्रादुर्भावः**

प्रायः सर्वेषां भारतीयनामास्तिकानां जनानामस्ति अनादिकालादनुवर्तमानो विश्वासः, यत् सकलजगत्सृष्टिभ्यतिसंहारादिहेतुः ईश्वरः कश्चित् वर्तते, तेन विना तृणमपि न चलति, तस्य भजनं विना नान्योऽस्त्युपायो मानवानामिहामुत्र च श्रेयः प्राप्तये इति। श्रूयते च 'यज्ञेन यज्ञमयजन्त देवाः' इति। स्मर्यते च-'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज'[16] इति, 'मदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर'[17] इति च एवं कर्मयोगसमाराध्यस्येश्वरस्य सात्त्विककर्माचरणनिर्मलीकृतेन मनसा भावनमपि पातञ्जले योगशास्त्रे पसिद्धम्; 'ईश्वरप्रणिधानाद्वा'[18] इत्यारभ्य 'तज्जपस्तदर्थभावनम्'[19] इत्यन्तेन प्रणवजपविशिष्टेश्वरभावनरूपस्य, 'तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'[20] इत्यादिना सर्वकर्मणां तस्मिन्नर्पणरूपस्य च प्रणिधानस्योक्तत्वात्। तमेतं सर्वज्ञं सत्यसङ्कल्पं स्वसङ्कल्पाधीनस्वेतरसमस्तवस्तुप्रवृत्तिभेदमीश्वरं ज्योतिष्टोमादिभिर्यज्ञैः, प्रासादतटाकनिर्माणादिना पूर्तेन, शीतातपसहनादिना तपसा, अहिंसादिभिर्यमैः शौचसन्तोषादिभिर्नियमैः, आसनप्राणायामादिना तपसा, अहिंसादिभिर्यमैः शौचसन्तोषादिभिर्नियमैः, आसनप्राणायामादिना योगेन महर्षयोऽपि विविदिषन्ति। तस्मिन् ज्ञाते सर्वमिदं जगत् ज्ञातं भवतीति विज्ञाय श्रेयस्तकामैर्मानवैः ईश्वरप्रणिधानपरैर्भाव्यमिति अध्यात्मशास्त्राण्युद्घोषयन्ति। गीतं च भगवता-

**"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।।"[21]**

**"भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति।।"[22]**

इति। एतादृशमीश्वरं येऽपलपन्ति शैलसारहृदयाः तेऽवश्यं पुरुषार्थात् भ्रश्येरन्। उक्तं हि कुसुमाञ्जलावन्ते-

**"इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते, येषां नास्पदमादधासि हृदये ते शैलसाराशयाः।।"[23]**

श्रुतिस्मृतिपुराणेतिहासानुभवप्रमाणैर्दृढं प्रमितोऽपीश्वरः यावत् युक्तिभिः न साध्यते तावत् युक्तिमात्रप्रमाणकाः ईश्वरानभ्युपगन्तारो मतान्तरस्थाः दुर्युक्तिभिः ईश्वरो नास्तीति साधने प्रवर्तमानाः न निरस्ता भवेयुः, तेषां वचसि प्रामाण्यभ्रान्त्या आस्तिका अपि कलुषितमतयः स्युः इति पर्यालोच्य परमकारुणिकाः पदवाक्यप्रमाणपारावारपारीणाः आस्तिकाग्रेसराः उदयनाचार्याः युक्तिभिरीश्वरसाधनतत्परं न्यायकुसुमाञ्जलिनामकं प्रबन्धरत्नं प्राणैषुः। उक्तं च कुसुमाञ्जल्यारम्भे-

**"न्यायचर्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानन्तरागता।।"[24]**

आत्मपरमात्मनि विप्रतिपत्तयोऽवान्तरविप्रतिपत्त्यविवक्षया पञ्च प्रदर्श्यन्ते, अप्रत्यक्षस्य परलोकसाधनस्यादृष्टाख्यस्याभावात्; ईश्वराभावेऽपि नित्यनिर्दोषवेदमूलकत्वाङ्गीकारेण वा वेदस्य कपिलादिकृतत्वाङ्गीकारेण वा परलोकसाधनयागाद्यनुष्ठानसम्भवात्; ईश्वराभावसाधक प्रमाणसद्भावात्; ईश्वरस्य सत्त्वेऽपि प्रमाणाभूतत्वाभावात्; ईश्वरसाधकप्रमाणाभावाच्चेति। कःपुनरिह पञ्चम्यर्थः? उच्यते। इमास्तावत् पञ्चम्यन्तप्रतिपाद्याः पञ्च विपरीतकोट्यः। तत्प्रतिपादकवाक्यं च विप्रतिपत्तिः। अर्थं बुध्वा शब्दरचनेति विप्रतिपत्त्यात्मकशब्दप्रयोगे कोटिज्ञानं कारणमिति कोटीनां विषयविधया जनकतावच्छेदकत्वात्प्रयोजकत्वमस्तांति तदेव पञ्चम्यर्थ इति।यद्वा इह ईश्वरेऽस्तिन

वेति विप्रतिपत्तिरुक्त लौकिकसाधनाभावादिपञ्चहेत्वधीनत्वात् पञ्चतयी। तदधीनत्वं च तत्साध्यनास्तित्वविषयकत्वम्।

इदमत्र बोध्यम्-अदृष्टाधिष्ठातृतया परलोकसाधनबोधकवेदोपदेष्ट्टतया क्षित्यादिकार्यकर्तृत्वेन चेश्वरः सिषाधयिषितः। तत्रालौकिकसाधनभ्यैवाभावे सुतरां न तदधिष्ठातृतयेश्वरसिद्धिरिति चार्वाकप्रत्यवस्थानम्। अत्र प्रथमेऽवान्तरविप्रतिपत्तिविवेचने तु वेदोपदेष्ट्टत्वादिना तत्साधनमपि निरस्तं भवति। तथा हि-पर एव लोको नास्ति, यस्य साधनमन्विष्यत इति यदि ब्रूयात् तर्हि तद्बोधकस्य वेदस्य प्रामाण्याभावेन न तदुपदेष्ठ्टतयाऽयं साधनीयः। यदि तु कार्यकारणभाव एव नास्ति, कुतः परलोकस्य साधनविचार इति शङ्केन, तदा सामान्यतः कार्यकारणभावस्यैवास्वीकारात् क्षित्यादिकर्तृतयेश्वरसाधनं दुष्करमिति। एवं सर्वथेश्वरनिराकरणं चार्वाकचिकीर्षितम्। तत्र च प्रथमविप्रतिपत्त्यन्तर्गता अवान्तरविप्रतिपतयः पञ्च। कार्यकारणभावस्यानङ्गीकारेण कार्यस्य कारणमापेक्षत्वाभावात्, क्वचित्मापेक्षत्वदर्शनेऽपि सर्वत्र तन्नियमाभावात्, सत्यपि नियमे सर्वत्रैकरूपकारणजन्यत्वपम्भवात्, विलक्षणविविधकारणावश्यकत्वेऽपि परलोकतत्साधनखीकारस्यानावश्यकत्वात्, आवश्यकत्वेऽपि यागदानादेरेव साधनत्वराम्भवेनात्मसमवेतादृष्टसद्भावे प्रमाणभावाच्चेति। आसां निरसनेनात्र प्रथमविप्रतिपतिर्निरस्ता भवति।

**आकरग्रन्थाः**

1. न्यायभाष्यम्
2. तत्वचिन्तामणिः
3. प्रत्यक्षतत्त्वचिन्तामणिविमणिविमर्षः
4. न्यायवार्तिकम्
5. मनुस्मृतिः
6. न्यायकुसुमाञ्जलिः
7. योगसूत्रम्

सन्दर्भ :

1. न्या.भा.सु.
2. न्या.भा.
3. त.चि., प्र.ख. पु.सं. ११८
4. न्या.भा., सू.स., प्र.अ.प्र.आ. १
5. अ.को.श.व. ६ पु.सं ६५
6. न्या.सू.११
7. छा.उ., पु.सं. ३६४
8. न्या.भा.
9. न्या.भा.द्वि.अ. प्र.आ. पु.सं. १६०. सू.सं. ६८
10. न्या.कु.च.स्त. श्लो.सं. ६, पु.सं १८२
11. मनु.द्वा. अ.श्लो. १०६, पु.सं. ४८५
12. न्या.वा.
13. न्या.वा. ११.१, पु.सं. ४८
14. न्या.म. प्र.आ. पु.सं १०
15. न्या.वा.
16. भगवद्गीता 18-166
17. भगवद्गीता 3-9
18. यो. सू. 1-23
19. यो. सू. 1-28
20. यो. सू. 2-1
21. भगवद्गीता 1-36
22. भगवद्गीता 5-29
23. कुसुमाञ्जलिः 5-18
24. न्यायकुसुमाञ्जलिः 1-3